# संस्कृत-वार्ता:

दिनाङ्क :- 05.06.2025 सायम् :- 06:20

आदौ-मुख्यवार्ता:

- केन्द्रे राष्ट्रिय-लोकतान्त्रिक-गठबन्धनस्य एकादशवर्षपूर्त्यवसरे श्रीमोदिना निर्धनानां कल्याणाय स्वप्रशासनस्य समर्पणम् कारुण्यञ्च वर्णितम्।
- राष्ट्रपतिना द्रौपदीमुर्मुवर्यया विश्वपर्यावरणदिवसावसरे हरित-भविष्याय सामुहिक-कार्याचरणायबलं प्रदत्तम्, सहैव, प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे दिल्ल्यां विशेषवृक्षारोपणाभियानम् सुसम्पन्नम्।
- आतङ्कवादसम्बद्धप्रकरणमालक्ष्य राष्ट्रियान्वेषणाभिकरणेन जम्मू-कश्मीरस्य द्वात्रिंशत्-स्थानेषु अन्वेषणं कृतम्।
- भारतं समेत्य विश्वस्य लक्षाधिका: जना: अद्य साउदीअरबदेशे हजयात्रां कुर्वन्त: सन्ति।
- अमेरिकीराष्ट्रपतिः डोनाल्ड- ट्रम्पः राष्ट्रियसुरक्षायाः, जनसुरक्षायाश्चच समाह्वानानि उद्दिश्य द्वादश-देशानाम् नागरिकाणां अमेरिकादेशे प्रवेशं प्रतिबन्धितवान्।
- इंडोनेशिया-ओपन-बैडमिंटन-प्रतिस्पर्धायां चिराग-शेट्टी, सात्विक-सांईराज-रंकीरेड्डी इत्येतौ भारतीययुगलौ स्पर्धायाः प्रागुपान्त्यचक्रे प्रविष्टवन्तौ।
- फ्रेंच-ओपन-टैनिस-प्रतिस्पर्धायां अद्य सायं महिला-एकलवर्गीयोपान्त्यचक्रे आर्यना-सबालेंका इगा-स्विएटेक इत्येतां सम्मुखीकरिष्यति अपरत्र कोको गौफ इत्यस्याः प्रतिस्पर्धा लोइस बोइसन इत्यतां विरुध्य भविष्यति।

-------------------------

प्रधानमन्त्री-एकादशवर्ष

प्रधानमन्त्रिणा नरेन्द्रमोदिना निर्धनानां कल्याणाय स्वप्रशासनस्य समर्पणम् कारुण्यञ्च वर्णितम्। केन्द्रे राष्ट्रिय-लोकतान्त्रिक-गठबन्धनस्य एकादशवर्षपूर्त्यवसरे श्रीमोदिना जनानां , निर्धनतां दूरीकर्तुं सहैव नागरिकाणां सशक्तिकरणाय सर्वकारस्य परिवर्तनात्मक-प्रयासाः प्रकाशिताः। प्रधानमन्त्रिणा श्री नरेन्द्रमोदिना एकं चलचित्रसन्देशं प्रदर्शयन् पर्यावरणस्य संरक्षणे क्रियमाणा: प्रयासा: प्रशंसिता:।

एकस्मिन् सामाजिकान्तर्जालीयसन्देशे श्रीमोदिना प्रधानमन्त्री-आवासयोजना, प्रधानमन्त्री-उज्ज्वला-योजना, जनधन-योजना, आयुष्मानभारत-योजना इत्यादयः उदाहृताः। तेन सबलं प्रोक्तं यत् एताभिः योजनाभिः आवासस्य, स्वच्छपाकेन्धनस्य, वित्तालयसेवायाः, स्वास्थ्यसेवायाश्च गुणवत्ता वर्धिष्यते। सः अवदत् यत् प्रत्यक्षलाभस्थापनस्य, डिजिटलसमावेशस्य, ग्रामीणमूलसंरचनायाः च प्रयासेन अन्तिमबिन्दुपर्यन्तं पारदर्शिता, लाभानां शीघ्रं वितरणं च सुनिश्चितम् अस्ति। श्रीमोदी पञ्चविंशतिकोटितोप्यधिकेभ्यः जनेभ्यः निर्धनतां पराजयितुं एतेषां उपक्रमाणाम् भूमिकां प्रकटितवान्। सः समावेशी आत्मनिर्भर-भारतस्य निर्माणार्थं सर्वकारस्य प्रतिबद्धतां पुनः प्रकाशितवान् , यत्र प्रत्येक- नागरिकः गौरवेण जीवितुं अवसरं प्राप्स्यति।

------------------------

विश्वपर्यावरणदिवस

अद्य विश्वपर्यावरणदिवसावसरे नवदिल्ल्याः भगवान्-महावीर-वनस्थली-

उद्याने प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे विशेषवृक्षारोपणाभियानम् सुसम्पन्नम्। एक पेड माँ के नाम इत्यस्योपक्रमस्यान्तर्गतं श्रीमोदिना अश्वत्थ-वृक्षारोपणं कृतम्। अरावली-हरित-प्राचीर-परियोजनायाः अङ्गत्वेन एतत् वृक्षारोपणम् अभवत्, यस्योद्देश्यं अरावली-पर्वतस्य सप्तशतकिलोमीटर्-परिमितस्य पुनर्नवीनीकरणम् इत्यस्ति। परियोजनायाः उद्देश्यं दिल्ली-राजस्थान-हरियाणा-गुजरातादीनां चतुर्णां राज्याणां ऊनविंशति-मण्डलेषु अरावली-

पर्वतश्रेण्याः परितः पञ्च-किलोमीटर्-पर्यन्तं हरिताच्छादन-प्रसारणं वर्तते। सहैव वनीकरणेन, पुनर्नवीनीकरणेन, जलनिकायानां पुनस्र्थापनेन च अरावल्याः जैवविविधतां वर्धयितुं शक्यते। एतैः पदक्षेपैः क्षेत्रस्य मृदा- उर्वरकता, जलस्य उपलब्धता, जलवायुप्रतिरोधकक्षमता च परिष्कृता भविष्यति। एताभिः परियोजनाभिः स्थानीयजनेभ्यः वृत्त्यावसराः उपलप्स्यन्ते। अस्मिन् अवसरे प्रधानमन्त्री श्रीमोदी दिल्लीसर्वकारस्य स्थायिपरिवहनपरिकल्पनायाः अन्तर्गतं द्विशत-विद्युत्बसयानेभ्यः हरितध्वजं प्रदर्शितवान्, विश्वपर्यावरणदिवसावसरे राष्ट्रपतिद्रौपदी मुर्मुः, उपराष्ट्रपतिः जगदीपधनखडः प्रधानमन्त्री नरेन्द्रमोदी च स्वसंकल्पं सुदृढीकर्तुं, ग्रहस्य रक्षणार्थञ्च नागरिकाणां आह्वानं कृतवन्तः।

------------------------

राष्ट्रियान्वेषणाभिकरणं

आतङ्कवादसम्बद्ध- प्रकरणमालक्ष्य राष्ट्रियान्वेषणाभिकरणं जम्मू-कश्मीरस्य द्वात्रिंशत्-स्थानेषु अन्वेषणं कुर्वदस्ति। पुलवामा- कुलगाम-शोपियान्-बारामुल्ला- कुपवाड़ा-मण्डलेषु अन्वेषणं प्रचलति। आतङ्कवादस्य षड्यंत्रप्रकरणे विभिन्नानां आतङ्कवादी-संगठनानां कार्यकर्तृणां विरुद्धं प्राप्तसूचनायाः आधारेण प्रातःकालादेव अन्वेषणं जायमानमस्ति।

------------------------

प्रधानमन्त्री-जम्मू-कश्मीर यात्रा

प्रधानमन्त्री नरेन्द्रमोदी श्वः जम्मू-कश्मीरस्य यात्रावधौ उधमपुर-श्रीनगर-बारामुल्ला-रेल-लिंक- परियोजनां राष्ट्राय समर्पयिष्यति। आकाशवाण्या वार्ताविभागेन सह संवादक्रमे रेलवे-परिषदः कार्यकारी-निदेशकेन दिलीप-कुमारेण कथितं यत् प्रधानमन्त्री अवसरेऽस्मिन् चेनाब-सेतोः अञ्जी-सेतोश्चापि उद्घाटनं विधास्यति।

-------------------------

जलाप्लव- सिक्किम

जलाप्लावेन प्रभाविते सिक्किम-राज्ये वर्षा-व्यवधानात् चटेन-नगरात् पर्यटकानां निष्कासनं स्थगितम्। अद्य प्रातःकाले एम.आइ.-सप्तदश उदग्र-विमानयोः प्रस्थानं सफलतया सम्पन्नम्। यत्र नवोत्तरैकशत-पर्यटकेषु त्रिषष्ठी- पर्यटकाः चटेन-नगरात् पाक्योङ्ग-ग्रीनफील्ड्-विमानस्थानकं प्रापिताः। असमराज्ये अविरामवृष्ट्या नदीनां जलस्तरं निरन्तरं प्रवर्धते, येन नूतनक्षेत्राणि जलमग्नानि भवन्ति, अतः जलाप्लावस्य स्थितिः गभीरा एव वर्तते। ऊनविंशति-मण्डलेषु षड्-लक्षाधिकाः जनाः, सार्धैकसहस्र-ग्रामाश्च प्रभाविताः सन्ति। वर्षासम्बद्ध-घटनाभिः मृतकानां संख्या चतुर्दशमितं यावत् अभवत्। अद्यापि सप्तमे दिने असमराज्ये तीव्रजलप्रलयस्य स्थितिः वर्तते। ब्रह्मपुत्र- बराक-बुर्ही-दिहिंग-कोपिली- सोनई-कटखलादयः सहायक- नद्यः संकटस्तरात् उपरि प्रवहन्ति। असमराज्यस्य आपत्प्रबन्धन-प्राधिकरणानुसारं नवत्यधिकैकशत-उद्धारशिबिरेषु एकचत्वारिंशत्सहस्राधिकाः जनाः सन्ति। राज्ये विभिन्नेषु स्थानेषु मार्ग-रेल-नौका-सेवाः बाधिताः। इदानीं भारतीयऋतुविभागेन सम्पूर्णे राज्ये एकान्तस्थानेषु वज्रपातेन सह वृष्टेः सञ्चेतना प्रसारिता। अरुणाचलप्रदेशे निरन्तरं प्रचण्डवृष्ट्या सामान्यजीवनं बाधितं जातम्, राज्ये त्रयस्त्रिंशत्सहस्रतोप्यधिकाः जनाः प्रभाविताः। आकस्मिकजलप्रलयेन भूस्खलनेन च मार्गावरोधाः उत्पन्नाः, येन बहवः आन्तरिकग्रामाः विच्छिन्नाः अभवन्। भारतस्य ऋतुविभागेन अद्य पूर्वोत्तरभारते प्रचण्डवृष्टिः, सहैव आगामिसप्तदिवसेषु च क्षेत्रे वर्षायाः पूर्वानुमानं प्रख्यापितम्।

-------------------------

दुबई-अरफात-दिवसः

वार्षिकहज-यात्रायाः महत्त्वपूर्णसंस्कारस्य वुकुफ-ए-अरफात-इत्यस्य आचरणार्थं अद्य विश्वस्य लक्षाधिकाः मुसलिम-जनाः मक्का-समीपे अराफात-उद्याने एकत्रिताः अभवन्। धु अल-हिज्जाह इत्यस्य नवमे दिने आचरितः अराफात-दिवसः तीर्थयात्रा-अनुभवस्य पराकाष्ठां

प्रतिबिम्बयति, यत्र प्रतिभागिनः मध्याह्नात् सूर्यास्तपर्यन्तं तस्मिन् स्थले एकत्रिताः भवन्ति यत्र पैगम्बर-मोहम्मदः अन्तिमप्रवचनं दत्तवान्। जनानां मान्यता अस्ति यत् तस्य अनुष्ठानेन विना सम्पूर्ण-तीर्थयात्रा निष्फला भवति। अद्य विशाले अन्तर्राष्ट्रीयसमागमे भारतीयाः तीर्थयात्रिकाः सम्मिलिताः, यत्र जेद्दाह्नगरे भारतस्य महावाणिज्यदूतः फहेद सूरी इत्यनेन अराफाततः पुष्टिः कृता यत् सर्वे भारतीयाः नागरिकाः पवित्रस्थले सुरक्षितरूपेण समागताः सन्ति।

-------------------------

डोनाल्ड-ट्रम्प-प्रतिबन्ध

अमेरिकीराष्ट्रपतिः डोनाल्ड- ट्रम्पः राष्ट्रियसुरक्षायाः, जनसुरक्षायाश्चच समाह्वानानि उद्दिश्य अफगानिस्तान- म्यांमार-चाड्-काङ्गोगणराज्य- इक्वेटोरियल-गिनी-इरिट्रिय- हैटी-इरान्-लीबिया-सोमालिया- सूडान-यमनजत्यादीनां द्वादश- देशानाम् नागरिकाणां अमेरिकादेशे प्रवेशं पूर्णतया प्रतिबन्धयितुं घोषणापत्रे हस्ताक्षरं कृतवान्।

-------------------------

श्रीरामजन्म-भूमि

अद्य उत्तरप्रदेशे गङ्गादशहरापर्वणः शुभावसरे अयोध्यानगरस्य श्रीरामजन्मभूमिमन्दिरे राजारामचन्द्रादिदेवतानां मूर्तेः प्राण-प्रतिष्ठा अभवत्। अवसरेऽस्मिन् उत्तर-प्रदेशस्य मुख्यमन्त्रिणा योगी- आदित्यनाथेन रामपरिवारस्य प्राण-प्रतिष्ठासमारोहे भागं गृहीतम् ।

-------------------------

इंडोनेशिया-ओपन-बैडमिंटन-प्रतिस्पर्धा

इंडोनेशिया-ओपन-बैडमिंटन-प्रतिस्पर्धायां चिराग-शेट्टी, सात्विक-सांईराज-रंकीरेड्डी इत्येतौ भारतीययुगलौ स्पर्धायाः प्रागुपान्त्यचक्रे प्रविष्टवन्तौ।

------------------------

<u>फ्रेंच-ओपन-टिनिस-प्रतिस्पर्धा</u>

फ्रेंच-ओपन-टैनिस-प्रतिस्पर्धायां अद्य सायं महिला-एकलवर्गीयोपान्त्यचक्रे आर्यना-सबालेंका इगा-स्विएटेक इत्येतां सम्मुखीकरिष्यति अपरत्र कोको गौफ इत्यस्याः प्रतिस्पर्धा लोइस बोइसन इत्यतां विरुध्य भविष्यति।

।। इति वार्ता: ।।